श्रियै नमः ।

श्रीअयोध्यानिवासिश्रीबलरामाचार्यसङ्गृहीतः

श्रीरामजयन्त्यादिनिर्णयः ।

श्रीबलरामाचार्यचरणाश्रित—विद्यारत्न—तर्कभूषण
रामप्रपन्नाचार्यशास्त्रिणा पाठभेद-
टिप्पण्यादिद्वारा संस्कृत्य

एसिस्टेन्ट एकाउन्टेन्ट जनरेल एम. ए.
शचिन्द्रचन्द्रगुप्तसेनस्य द्रव्यसहायेन
वृन्दावनस्थ 'श्रीनिवास' यन्त्रालये
मुद्रापितो विजयते ।

सम्वत् १९७४] [रामानुजवत्सर ९०१

श्रीमते रामानुजाय नमः ।

श्रीरामजयन्तीनिर्णयः ।

चैत्रशुद्धनवमी श्रीरामनवमी. तदुक्तमगस्त्यसंहितायाम्–"चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ । उदये गुरुचन्द्रांशे स्वोच्चस्थे ग्रहपञ्चके ॥ मेषं पूषणि सम्प्राप्ते लग्ने कर्कटाह्वये । आविरासीत्स कलया कौशल्यायां परः पुमान् ॥ तस्मिन् दिने तु कर्तव्यमुपवासव्रतं सदा । तत्र जागरणं कुर्य्यात् व्रतपूर्त्यै सदा नरः ॥" इयञ्च मध्यान्हयोगिनी ग्राह्या ; "चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि । सैव मध्यान्हयोगेन महापुण्यतमा भवेत्" ॥ इति तत्रैवोक्तः । "चैत्रमासनवम्यां तु जातो रामः स्वयं हरिः । पुनर्वस्वृक्षसंयुक्ता सा तिथिस्सर्वकामदा ॥ श्रीरामनवमी प्रोक्ता सा तु कोटिग्रहाधिका । केवलापि सदोपोष्या नवमीशब्दसङ्ग्रहात् ॥ तस्मात्सर्वात्मना सर्वैः कार्यं तन्नवमीव्रतम्" ॥

दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वस्वृक्ष-संयुक्तामपि त्यक्त्वा परैव कार्या ॥ तदुक्तमगस्त्यसंहितायाम्– "नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः । उपोषणं तु कुर्वीत दशम्यां चैव पारणम्" इति ॥ अष्टमी सर्वापि नोपोष्या' इतिमाधवः ॥ रामार्चनचन्द्रिकायामपि– विद्धा-चेद्दक्षसंयुक्ता व्रतं तत्र कथं भवेत् । विद्धा निषेधश्रवणा-न्नवमी चेतिवाक्यतः ॥ वैष्णवानां विशेषस्तु तत्र विष्णु-परैरपि । दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वैष्णवैः ॥ तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितम्" इतिवदन् यदा प्रातस्त्रिमुहूर्ता नवमी. दशमी च क्षयवशात् सूर्योदयात्प्रागेव सम्प्राप्यते, तदा स्मार्तानां तत्रैवैकादशीनवमीनिमित्तोपवासा-न्नवमीव्रताङ्गपारणालोपः स्यात् । अतोऽष्टमीविद्धैव स्मार्तैः कार्या, वैष्णवानामरुणोदयविद्धैकादश्या हेयत्वान्न पारणा-लोपप्रसङ्ग इति द्वितीयैव कार्येति सूचयति ; दशमीवृद्ध्यभावे अष्टमीविद्धायाः क्षये च वैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्धम् ; इदं व्रतं संयोगपृथक्त्वन्यायेन काम्यं नित्यं च ; तदुक्तं हेमा-द्रावगस्त्यसंहितायाम्– "उपोषणं जागरणं पितॄनुद्दिश्य तर्प-णम् । तस्मिन् दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ॥

सर्वेषामप्ययं धर्मो भुक्तिमुक्त्यैकसाधकः । अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम् ॥ पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः । यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः । कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः । अकृत्वा रामनवमीव्रतं सर्वोत्तमोत्तमम् । व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् । प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः । उपोषणं न कुरुते कुम्भीपाकेषु पच्यते" इति ॥

केचित्तदुपासकानामेवेदं व्रतं नित्यम्, नत्वन्येषामित्याहुः । अन्येषां त्वकरणे दोषश्रवणात् सर्वात्मना कार्यं सर्वैर्नवमीव्रतमिति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यम्; अन्यथा जन्माष्टम्यादावपि तदुपासकानामेव नित्यतां वक्तॄन् के वारयन्तीत्याहुः । अत्र विशेषो हेमाद्रावगस्त्यसंहितायामुक्तः– "आचार्यं चैव सम्पूज्य वृणुयात्प्रार्थयन्निशि । श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ॥ भक्त्याऽऽचार्यो भव प्रीतः श्रीरामोऽसि त्वमेव नः" तथा "स्वगृहे चोत्तरे देशे धान्यस्योपरि मण्डपम् । शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलङ्कृतम् ॥ गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलङ्कृतम् । गदाखड्गाङ्गदैश्चैव पश्चिमे

सुविभूषितम् ॥ पद्मस्वस्तिकनीलैश्च कौबेरे समलङ्कृतम् । मध्ये हस्तचतुष्काढ्यवेदिकायुक्तमायतम् ॥ ततस्सङ्कल्पयेद्देवं राममेव स्मरन् द्विजः । अहं रामनवम्यां च रामाराधनतत्परः ॥ उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि । इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः ॥ श्रीरामप्रीतये दास्ये रामभक्ताय धीमते। प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे ॥ अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च । ततः स्वर्णमयीं रामप्रतिमां च प्रयत्नतः । निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीम् ॥ बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने । वामेनाथ करेणायं देवीमालिङ्ग्य संस्थिताम् ॥ सिंहासने राजतेऽत्र पलद्वयविनिर्मिते" । तथा अशक्तो यो महाभाग भक्त्या वित्तानुसारतः । पलेनार्धपलेनाथ तदर्धार्धेन वा पुनः ॥ सौवर्णं राजतं वापि कारयेद्रघुनन्दनम् ॥ पार्श्वे भरतशत्रुघ्नौ धृतच्छत्रकरावुभौ । चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत् । दक्षिणाङ्के दशरथं पुत्रावेक्षणतत्परम् । मातुरङ्कगतं राममिन्द्रनीलसमप्रभम् । पञ्चामृतस्नानपूर्वं सम्पूज्य विधिवत्ततः" कौसल्यामन्त्रस्तु— 'रामस्य जननी चापि शरूपमिदं जगत् । अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥

नमो दाशरथायेति पूजयेत् पितरं ततः । ” अत्र दशावरणपञ्चावरणपूजा विज्ञेया । “ अशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः । दशाननवधार्थाय धर्मसंस्थापनाय च ॥ राक्षसानां विनाशाय दैत्यानां निधनाय च । परित्राणाय साधूनां जातो रामस्स्वयं हरिः । गृहाणार्घ्यं मया दत्तं भ्रातृभिस्सहितोनघ ॥ पुष्पांजलिं पुनर्दत्वा यामे यामे प्रपूजयेत् । दिवैव विधिवत्कृत्वा रात्रौ जागरणं ततः । ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः ॥ समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने । ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥ पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा विधानतः । लौकिकाग्निविधानेन शतमष्टोत्तरं ततः ॥ साज्येन पायसेनैव स्मरन् राममनन्यधीः । ततो भक्त्या सुसंतुष्टः आचार्यं पूजयेन्मुने ॥ ततो रामं स्मरन् दद्यादेनं मन्त्रमुदीरयन् । इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् ॥ चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते । श्रीरामप्रीतये दास्ये तुष्टो भवति राघवः ॥ इति दत्वा विधानेन दद्याद्वै दक्षिणां भुवम् । ब्रह्महत्यादिपापेभ्यो मुच्यते नात्रसंशयः” इति ॥ इयं मलमासे न कर्त्तव्या । ‘न कुर्यान्मलमासे तु महादानव्रतानि च’ इति माधवीयसंग्र-

हवचनात् । ननु रामनवमीव्रतस्य नित्यत्वादेकादशीवत् मलमासेपि कर्तव्यता स्यादिति चेत्. अत्र ब्रूमः,– नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः, किंतु. एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि–इत्यादिनिषेधस्य मलमासेपि पालनीयत्वात्। न त्विह तथेति व्रतत्वेन प्राप्तेः । एवं जन्माष्टम्यादावपि बोध्यम् । पाण्डित्यविख्यापनतत्पराणामन्यैर्विरुद्धैरलमव्यवस्थैः । निर्मत्सराः पश्यत तत्प्रबन्धं ब्रवीदयं वैदिकसार्वभौमः ॥

इति हारीतकुलतिलकस्य सरस्वतीवल्लभपौत्रस्य श्रीरङ्गनाथसूनोः वैदिकसार्वभौमापरनामधेयस्य श्रीवेङ्कटनाथस्य कृतिषु दशनिर्णय्यां रामजयन्तीव्रतनिर्णयः समाप्तः ॥

श्रीमते रामानुजाय नमः ।

श्रीरामजयन्तीनिर्णयः ।

वीरराघवदासेन वाधूलान्वयजन्मना ।
सच्चरित्रपरित्राणं सतां सम्प्रीतये कृतम् ॥

श्रीरामनवमी नाम चक्रवर्तिकुमारस्य श्रीरामस्यावतारकालः । अगस्त्यसंहितायाम्—

चैत्रे मासे नवम्यां तु शुक्लपक्षे रघूद्वहः । प्रादुरासीत् पुरा ब्रह्मन् परं ब्रह्मैव केवलम् ॥ १ ॥ तस्मिन्नेव तु कर्तव्यमुपवासव्रतं सदा । तथा 'चैत्रशुद्धेतु कर्तव्यं नवम्यां व्रतमुत्तमम्'' इति । इदञ्च श्रीरामनवमीव्रतं नित्यं काम्यञ्चेति व्रतद्वयम्, तत्र काम्यं सङ्कल्पदानोपवासमण्डपनिर्माणप्रतिमावाहनजागरणार्चनप्रतिमादानब्राह्मणभोजनादिशरीरम् । नित्यं तु भगवदाराधनविशिष्टोपवासमात्रशरीरमिति रूपभेदात् कर्मभेदः । तत्र काम्यव्रतस्वरूपमुक्तम् अगस्त्यसंहितायाम्– "तस्मिन्दिने तु कर्त्तव्यमुपवासव्रतं तथा । रात्रौ

जागरणं कुर्याद्रघुनाथपरो भुवि ॥ १ ॥ प्रतिमायां दिने तत्र पूजां कुर्याद्यथाविधि । प्रातर्दशम्यां कृत्वा तु सन्ध्या-स्नानादिकाः क्रियाः ॥ २ ॥ सम्पूज्य विधिवद्रामं भक्त्या शक्त्यनुसारतः । ब्राह्मणान् भोजयेत् भक्त्या दक्षिणा-भिश्च तोषयेत् ॥३॥ गोभूतिलहिरण्याद्यैर्वस्त्रालङ्कारभूषणैः । रामभक्तः प्रयत्नेन प्रीणयेत् परया मुदा ॥ ४ ॥ एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् । अनेकजन्मसिद्धानि पातकानि बहूनि च ॥ ५ ॥ भस्मीकृत्य व्रजत्येव तद्विष्णोः परमं पदम् । सर्वेषामप्ययं धर्मो मुक्तिभुक्त्येकसाधनम् ॥ ६॥ नरो रामनवम्यां तु श्रीरामप्रतिमाप्रदः । विधानेन मुनि-श्रेष्ठ स मुक्तो नात्र संशयः ॥ ७ ॥ तत्रैवान्यत्र च "ततः सङ्कल्पयेदेवं राममेव स्मरन्मुने । अस्यां रामनवम्यां तु रामा-राधनतत्परः ॥१॥ उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि । इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः ॥ २ ॥ श्रीराम-प्रीतये दास्ये रामभक्ताय धीमते । प्रीतो रामो हरत्वाशु पा-पानि सुबहूनि मे । अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च" इति ॥ अन्यत्र– "एवं यः कुरुते रामप्रतिमादानमुत्त-मम् । ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥

तुलापुरुषदानादिफलं प्राप्नोति सुव्रतः । अनेकजन्मसंसिद्धैः पापेभ्यो मुच्यते ध्रुवम् ॥ २ ॥ बहुना किमिहोक्तेन मुक्तिस्तस्य करे स्थिता । कुरुक्षेत्रे महापुण्ये सूर्यपर्वण्यनेकशः ३ तुलापुरुषदानाद्यैः कृतैर्यल्लभते फलम् । तत्फलं लभते मर्त्यो दानेनानेति सुव्रत" इति । उक्तसाङ्गमुख्यव्रतासमर्थं प्रति गौणव्रतमाह स एव- "अकिञ्चिनोपि नियत उपोष्य नवमीदिने । कृत्वा जागरणं भक्त्या मम भक्तैः समन्वितः ॥ १ ॥ स्मरन्नाम धिया भक्त्या पूजयेद्विधिवन्मुने । जपन्नाममनुर्माया रामनामस्समन्वितम् । प्रातः स्नात्वापि विधिवत्कृत्वा सन्ध्यादिकाः क्रियाः । गोभूतिलहिरण्यादि दद्याद्वित्तानुसारतः ॥ ३ ॥ श्रीरामचन्द्रभक्तेभ्यो विद्वद्भ्यः श्रद्धयान्वितः । पारणञ्च प्रकुर्वीत ब्राह्मणैश्च स्वशक्तितः ॥ ४ ॥ एवं यः कुरुते भक्त्या सर्वपापैः प्रमुच्यते " इति । अत्राप्यशक्तौ उपवासमात्रं कृत्वा किञ्चिद्रामाराधनं कुर्यात् । तस्याप्यभावे अनर्थमेवायते नित्यवृतम् उपवासशरीरकम् । अकरणे प्रत्यवायशिरस्कमाह "प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः । कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः । त्रैलोक्यपापम-

श्नाति स्वधर्मो निष्फलो भवेत् ॥ १ ॥ यस्तु श्रीरामनवमी-मनादृत्य नराधमः। नास्तिको नरकं गच्छेद्यावच्चन्द्रदिवाकरौ॥२॥ एवं गौणमुख्यभेदेन काम्यव्रतमुक्त्वा तत्राशक्तौ उपवासमात्र-शरीरकं व्रतं विधाय तस्य नित्यत्वमुक्तम्; अन्यत्रानर्थपरिहार-मात्राकाङ्क्षिभिः प्रपन्नैरुपवासमात्रशरीरकं व्रतमेव अनुष्ठी-यते; अत एवास्मिन्व्रते केनापि प्रकारेणान्वयो मुमुक्षमात्र-स्यावश्यको विधीयते। "तस्मात् सर्वात्मना सर्वे कृत्वैव नवमीव्रतम्। मुच्यन्ते सर्वपापेभ्यो यान्ति ब्रह्म सनातनम्॥ इति रूपभेदान्नित्यकाम्यव्रतभेदसिद्धिः। एवं तत्तदनुष्ठानकाल-भेदादेव तद्भेदो व्यवसीयते, साच नवमी तावद्द्वादशविधा कीर्तिता। अगस्त्यसंहितायाम्— 'शुद्धा विद्धेतिभेदेन नवमी सा द्विधा मता। समा न्यूनाधिका चेति शुद्धापि नवमी त्रिधा ॥१॥ पुनर्वस्वृक्षसंयोगवियोगाभ्यां च षड्विधा। एवं द्वादशधा भिन्ना नवमी तत्र निर्णयः॥ इति। अत्र पुनर्वसुनक्षत्रयुक्तशुद्धशुद्धाधिकशुद्धसमासु नित्यव्रतनिष्कामानां सकामानां च सर्वेषामुपवासः, निष्कामानां वेधाभावात् सकामानां तात्कालीनत्वात्. तदुक्तं तत्रैव— महाफलप्रदा शुद्धा पुनर्वस्वृक्षयोगतः। पुनर्वस्वृक्षसंयोगः स्वल्पोपि यदि

दृश्यते, इति पुनर्वस्वृक्षयोगरहितास्वपि शुद्धासु सर्वेषामुपवासः, सकामानां तात्कालीनत्वात्, निष्कामानां शुद्धत्वात्। तदपि च तत्रैवोक्तम्—'चैत्रे शुद्धापि नवमी सा तिथिस्सर्वकामदा। चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः' इति नक्षत्रयुक्तविद्धन्यूनविद्धसमविद्धाधिकासु मध्ये विद्धन्यूनविद्धसमयोस्तत्कालयोगात्, विद्धाधिकायाश्च पूर्वदिन एव तत्कालसत्त्वाच्च पूर्वेद्युरेव विद्धनवम्यां सकामानामुपवासः। तदुक्तं 'पुनर्वस्वृक्षसंयुक्ता सा तिथिस्सर्वकामदा। श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका। चैत्रे शुद्धा तु नवमी पुनर्वसुयुता यदि' इति। अत्र विद्धाधिकायाः परत्र मध्यान्हानन्तर्यसत्त्वे परेद्युरेवोपवासः, पूर्वापरमध्यान्हव्याप्तत्वे तु मध्यान्हे पुनर्वसुनक्षत्रयुक्ता तिथिर्ग्राह्या, 'चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि। सैव मध्यान्हयोगेन महापुण्यतमा भवेत्' इत्यगस्त्यवचनात् उभयत्र तिथ्यृक्षयोगतौल्ये अधिकव्याप्तनिर्णयः, एवं नक्षत्रयोगरहितास्वपि कामिनामेवोपवासः, तत्र विद्धाधिकायाः परदिनेपि मध्यान्हसत्त्वे अधिकमध्यान्हव्यापिनी तिथिर्ग्राह्या। अत्र षड्विधासु विद्धास्वपि निष्कामानां नोपवासः, किन्तु तन्मात्रत्यागेन परदिन एवोपवासः। तदाह स एव "नवमी

चाष्टमीविद्धा त्याज्या विष्णुपरायणैः । उपोषणं नवम्यां वै दशम्यामेव पारणम्" इति । अथ विद्धाधिकायां परेद्यु-र्नवमीशेषमुपोष्य दशम्यामेव पारणं कार्यम्, सकामेनापि मध्यान्हयोगतिथिविषये तिथ्यन्त एव दशम्यामुपवासदिन-त्वेपि पारणं कार्यम्, उपवासतिथौ पारणायाम् उपवासभङ्गा-भावादिति धर्मसेतुनिबन्धनवाक्यात्; एवं विद्धाधिकशेषस्य मध्यान्हव्याप्तत्वाभावे दशम्यां यत्किञ्चिन्नवमीवे सैव निष्कामैर्ग्राह्येत्याह—'उदये नवमी किञ्चिद्दशमी सकला यदि । भवेच्च गुरुवारे च पुनर्वस्वृक्षता यदि । प्रतिवर्षसह-स्रेण लभ्यते स विशिष्यते" इति । एतस्य तिथिनिमित्त-त्वात् सकामानां च तात्कालिकनिमित्तकत्वनियमादेस्तद्वचना-न्निष्कामविषयमेव, अन्यथास्य प्रकरणस्य सकाममात्रविषयत्वे वेधावेधपरावान्तरप्रकरणमात्रस्य वैय्यर्थ्यापत्तिः । तत्कालव्या-पिन्येव गृह्येतेत्येकोक्त्यैव सामञ्जस्यादिति; अतो रूपभेदाद-नुष्ठानकालभेदाच्च नित्यं नवमीव्रतं, काम्यं नवमीव्रतं चेति व्रतद्वयं सिद्धम्; एवं विद्धाधिकायां निष्कामस्य उपवासप्रकार उक्तः । विद्धन्यूनविद्धसमयोस्तु किञ्चिन्नवमीयुक्तदशम्यामिव दशम्यामेवोपवासस्तस्यामेव पारणं च; ततश्च विद्धापक्षे मध्याह्न

एव निष्कामानां पारणं शुद्धर्क्षेऽपि मध्यान्हे एव पारणम्, अनन्ताख्ये 'तिथ्यन्ते पारणा कार्य्या जयन्तिफलमिच्छताम् । उत्सवान्ते च तत्कार्यं न्यस्तात्मभिरथेश्वर" वसिष्ठसंहितायां ' प्रपन्नानां मुमुक्षूणामुत्सवान्ते च पारणम् । विधिः स्याद्विष्णुसायुज्यसिद्धये मन्त्रसिद्धये''इति। प्रपन्नानामुत्सवान्ते च पारणविधानात् श्रीरामस्य मध्यान्ह एवावतारात् । नच श्रीरामनवम्या जयन्तीशब्दवाच्यताभावः । " जयं पुण्यं च कुरुते जयं पुण्यं च तां विदु"रित्युक्तजयन्तीपदप्रवृत्तिनिमित्तयोगेन श्रीरामनवम्या अपि जयन्तीशब्दवाच्यत्वे बाधकाभावादिति । अत्र श्रीरामनवम्युपवासदिनप्राप्तं पित्र्यं तद्दिन एव क्रियते मध्यान्हपारणादिति । अन्येषान्तु पितृसेवितमात्राय तद्दिन एव कार्य्यम्, 'उपवासो यदा नित्यं श्राद्धं नैमित्तिकं भवे'दिति नित्योपवासमात्रावलम्बनवचनप्रवृत्तेः श्रीरामनवम्युपवासस्य नित्यत्वाच्चेति ॥

इतिश्रीमहीसारपुरवास्तव्यवाधूलकुलतिलकश्रीमदण्णावय्यंगार्यापरनामधेयश्रीवीरराघवसूरीविरचिते सच्चरित्रपरित्राणे श्रीरामजयन्तीनिर्णयस्समाप्तः ।

श्रीमते रामानुजाय नमः ॥

श्रीरामनवम्यादिजयन्तीस्वरूपोत्सवान्तपारणानिर्णय उच्यते ।

वसिष्ठसंहितायाम्—'वक्ष्यामि देवदेवस्य रामजन्मदिनोत्सवम् । ऋक्षेपुनर्वसौ कुर्याच्चैत्रे नावमिके तिथौ' ॥ अगस्त्यसंहितायाम्—'चैत्रे मासि नवम्यां तु शुक्लपक्षे रघूत्तमः' विष्वक्सेनसंहितायाम्— राघवस्यैव वक्ष्यामि तथा जन्मदिनक्रियाम् । ऋक्षे पुनर्वसौ कुर्याच्चैत्रे नावमिके तिथौ' श्रीपराशरधर्मशास्त्रे—'मासि चैत्रे शुक्लपक्षे नवम्याञ्च पुनर्वसौ' वसिष्ठस्मृतौ षष्ठाध्याये—'मासि चैत्रे शुक्लपक्षे नवम्यान्तु पुनर्वसौ । कौशल्यायां समुत्पन्नो विष्णुः काकुत्स्थ ईरितः । पाद्मे चर्यापादे—' चैत्रे मासि पुनर्वस्वोर्जन्म रामस्य मङ्गलम्' इत्यादिवचनैश्चैत्रशुक्लनवम्येव श्रीरामजन्मोत्सवदिनत्वेन ग्राह्या । यद्यपि '' ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ । नक्षत्रेदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ॥ ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह । प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् ॥ कौसल्याऽजनयद्रामं सर्वलक्षणसंयु

तम्" इतिश्रीरामायणवचने 'उच्चसंस्थेषु पञ्चसु' इत्यत्र सूर्यस्याप्युच्चसंस्थपञ्चग्रहान्तर्गतत्वेन मेषशुक्लनवमीति प्रतीयते, तथापि चैत्रशुक्लनवम्याः मीने मेषे च सम्भाव्यमानतया श्रीरामावतारकाले रवेर्मेषे सम्भावितत्वात् ; तथोक्तं वाल्मीकिमहर्षिणा– उच्चसंस्थेषु पञ्चस्विति; तस्माच्चैत्रशुक्लनवम्यां तिथौ व्रतानुष्ठानस्य नानुपपत्तिः । नन्ववतारकालस्य मेषशुक्लनवमीत्वात् तादृशदिनस्यैव व्रतानुष्ठानकालतया मेषशुक्लनवम्यामेवोत्सवः कार्य इतिचेत्तथ्यम्; अवतारदिनस्य पुनर्वसुयुतत्वाच्च ग्रहपञ्चकवत्त्वसेन्दुबृहस्पतिकत्वकथनात्तादृग्गुणविशिष्टदिन एवोत्सवस्य कर्त्तव्यतया तादृशदिनस्येदानीं दुर्लभतया उत्सवानुष्ठानमेव न स्यात्; तस्मान्मीने मेषे वा यथासम्भवं चैत्रशुद्धनवम्येव व्रतदिनत्वेन परिग्राह्या· सापि नवमी श्रीवैष्णवैर्वेधरहितैव ग्राह्या, विद्धाया निषिद्धत्वात् ॥ निषेधश्च पाद्मे—अष्टम्या नवमी विद्धा त्रिमुहूर्त्तं यदा भवेत् । तदा परेद्युरेवेयं स्थिता ग्राह्या तु वैष्णवैः" अगस्त्यसंहितायाम् ॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः" स्कान्दे–'पुनर्वसुयुता रामनवमी यदि षण्मुख । त्रिभिर्मुहूर्तैर्विद्धा चेन्न ग्राह्या विष्णुतत्परैः" इत्यादिवचनैरव-

गम्यते परेद्युरुदयानन्तरं कलामात्रनवम्यभावेपि दशम्या-मेवोत्सवः कार्य इति ॥ ननु 'एकादशी तृतीया च षष्ठी चैव त्रयोदशी । पूर्वविद्धापि कर्तव्या यदि न स्यात्परेऽहनि इति वृद्धवशिष्ठोक्ततिथ्यन्तरन्यायेन परेद्युरुदयानन्तरं नवम्य-भावे पूर्वेद्युरष्टमीविद्धापि नवमी ग्राह्येति चेन्न; परेद्युस्सूर्योदया-नन्तरं नवम्या अभावे पूर्वेद्युस्त्रिमुहूर्ताष्टमीविद्धापि नवमी ग्राह्येति विशेषवचनादर्शनात् उदाहृतस्यैकादशीघटिततया विद्धाया एकादश्याः श्रीवैष्णवैरुपवासदिनत्वेनानङ्गीकर-णादवैष्णवविषयत्वात् तद्धटिततद्वचनमूलकन्यायस्यात्रा-ऽनवताराच्च । अनिरुद्धसंहितायाम्— "जयन्तीनाञ्च सर्वासामुत्सवान्ते तु पारणम् । कर्तव्यमैहिकासक्तैः पञ्चकाल-परायणैः" । संहितान्तरेपि— 'तिथ्यन्ते पारणं कार्यं तत्तत्फलमभीप्सता । उत्सवान्ते तु तत्कार्यं न्यस्तात्मभिरथे-श्वर' । जयत्सेनसंहितायाम्— 'तिथ्यन्ते वाथ भान्ते वा ह्युत्सवान्ते तु पारणम्। मुमुक्षूणामकामानामुत्सवान्ते तु पार-णम् ॥ काम्यार्थिनामशेषेण परेद्युः खलु पारणम्' । सुम-न्तुरपि "तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् । अतो-ऽन्यथा पारणायां वृतभङ्गमवाप्नुयात् ॥ पारणामुत्सवान्ते तु

कुर्युरेकान्तिनो हि ये" इत्यादिवचनैश्चैत्रशुद्धनवम्यां कर्कट-लग्ने श्रीरामभद्रजयन्तीविशेषाराधनं कृत्वा आराधनान्ते पारणं मुमुक्षुभिः कार्यम् । 'ननु जयन्तीनान्तु सर्वासा'मि-त्यादिवचनबलेन श्रीरामनवम्यामप्युत्सवान्ते पारणं कर्तव्य-मित्युक्तम्. तदयुक्तम्; श्रीरामनवम्यां जयन्तीत्वव्यवहारादर्श-नात्-इतिचेन्न; सङ्ग्रहे "जयन्ती द्विविधा प्रोक्ता मत्स्यादिदश-जन्मनाम् । तिथिप्रधानं सर्वेषां विना कृष्णत्रिविक्रमौ" इतिवचनेन तस्यापि जयन्तीत्वप्रतिपादनस्य दृष्टत्वात् । ननु " यस्तु रामनवम्यान्तु भुङ्क्ते मोहविमूढधीः । रौरवं नरकं प्राप्य वर्तते कल्पकोटिकम् ॥ ब्रह्महत्त्यादिपापानां दृष्टा शास्त्रेषु निष्कृतिः । रघुनाथनवम्यान्तु भोक्तृणां नास्ति निष्कृतिः ॥ श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहात्मिका । उपोषणं जागरणं तस्मिन् कुर्याद्विशेषतः ॥ वसिष्ठस्मृतौ "मासि चैत्रे शुक्लपक्षे नवम्यान्तु पुनर्वसौ । कौसल्यायां समुत्पन्नो विष्णुः काकुत्स्थ ईरितः ॥ तस्यां स्नानोपवा-साद्यैः पूजाजागरणादिभिः ॥ अर्चयेद्गन्धपुष्पाद्यैर्गीतवादि-त्रनर्त्तनैः ॥ मासि चैत्रे शुक्लपक्षे नवम्याञ्च पुनर्वसौ । तस्यां जातो जगन्नाथः काकुत्स्थो हरिरच्युतः ॥ तस्या-

मुपोष्य विधिवत्स्नात्वा सम्पूजयेद्धरिम्" इत्यादिवचनैः श्रीरामनवम्यामुपवास एव कार्य इतिचेत्—न; "मुमुक्षूणामकामानाम्" इत्यादिवचनानां मुमुक्षुविषयत्वेन 'यस्तु रामनवम्याम्' इत्युपवासपरसामान्यवचनानामुत्सर्गापवादनयेनाऽमुमुक्षुविषयत्वात् । नच 'जयन्तीनान्तु सर्वासा'मित्यादिवचनानां जयन्तीसामान्यविषयत्वेन 'यस्तु रामनवम्या'मित्यादिवचनानां जयन्तीविशेषविषयत्वेन उत्सर्गापवादन्यायेन श्रीरामनवम्यामुत्सवान्तपारणाया बाध इति वाच्यम्; पूर्वोक्तवचनानां जयन्तीसामान्यविषयत्वेऽपि अधिकारिविशेषविषयत्वेनैतेषान्तु वचनानां जयन्तीविषयत्वेऽप्यधिकारिसामान्यविशेषविषयत्वादधिकारिविशेषविषयकवचनान्तराभावाच्च मुमुक्षुविषये उत्सवान्तपारणाया अबाधितत्वात् । नच पारणाया उपवासपूर्वकत्वात् श्रीरामनवम्यामहोरात्रोपवासस्याहरुपवासस्य वा असम्भवादुत्सवान्तपारणं कथं सङ्गच्छत इति वाच्यम्; अत्राप्युपवासपूर्वकत्वास्याऽक्षतेः, कथमिति चेत् अहरुपवास-रात्र्युपवास-अहोरात्रोपवासादिषु अनुगतस्योपवासशब्दप्रवृत्तिनिमित्तस्य वक्तव्यतया तेष्वहर्भोजननिवृत्तित्वादेरननुगततया सर्वत्रानुगतं प्रवृत्तिनिमित्तं किञ्चि-

दार्ढ्येयम्। तच्च किमित्यपेक्षायां शास्त्रीयाया भोजननिवृत्तिस्तत्त्वमेवेतिवक्तव्यम्, नान्यत्किञ्चिदुच्यते; तथाच श्रीरामनवम्यामपि तादृशधर्मावच्छिन्नोपवासस्योत्सवान्तपर्यन्तं सद्भावात् पारणाया उपवासपूर्वकत्वमक्षतमेव। अत एव तिथ्यन्तभान्तपारणयोरप्युपवासपूर्वकत्वमुपपन्नं भवतीति। ननु मुमुक्षूणामुत्सवान्ते पारणाया अप्युपवासपूर्वकत्वोपपादनात् मुमुक्षूणामकामाना' मित्याद्युत्सवान्तपारणाविधायकवचनैः 'उपोषणं जागरणं तस्मिन् कुर्याद्विशेषतः' इत्याद्युपवासविधायकवचनानाममुमुक्षुविषयत्वेन व्यवस्थापनमसङ्गतमिति चेन्न; जागरणादिनियमसहिताहोरात्रोपवासस्यामुमुक्षुविषयवचनगतोपवासशब्दार्थत्वेनासङ्गत्यापादनस्यैवासङ्गतत्वान्न किञ्चिदपहीनम्॥

इति श्रीमदहोबिलमहास्थानपरिपालनचातुरीधुरीणश्रीमद्वेदमार्गप्रतिष्ठापनाचार्य परमहंसपरिव्राजकाचार्यश्रीभगवद्रामानुजाचार्य सर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्य-श्रीभगवद्रामानुजसिद्धान्तनिर्धारणसार्वभौमश्रीमच्छठकोप श्रीमद्रङ्गनाथयतीन्द्रमहादेशिकविरचित श्रीरामजयन्त्यादिपारणानिर्णयः समाप्तः।

श्रीमते रामानुजाय नमः ।

वीरराघवदासेन वाधूलान्वयजन्मना ।

सच्चरित्रपरित्राणं सतां सम्प्रीतये कृतम् ॥

अथ श्रवणद्वादशी निरूप्यते ।

"आभाकासितपक्षेषु मैत्रश्रवणरेवती । आदिमध्यावसानेषु भवेयुर्द्वादशीषु चेत् । ते पावनाह्वया योगा मुनिभिः परिकीर्तिताः । आभाकासितपक्षेषु मैत्रश्रवणरेवती । प्राप्नोति द्वादशी तत्र हरिमभ्यर्चयेन्नरः" ॥

मात्स्ये—"शेते विष्णुस्सदाषाढे भाद्रे तु परिवर्तते ।
कार्तिके प्रतिबुध्येत शुक्लपक्षे हरेर्दिने ॥"

कालादर्शे—"आषाढी शुक्लषष्ठी तु तिथिः कौमारिला स्मृता । तत्रैव शुक्लद्वादश्यां निद्राति भगवान् हरिः । स भाद्रपदमासे तु तत्रैव परिवर्त्तते । तयोरभ्यर्च्य गोविन्दं विदधीत महोत्सवम् । ते मैत्रश्रवणोपेते पावने परिकीर्तिते ॥" स्कान्दे— "भाद्रे तु द्वादशी शुक्ला श्रवणर्क्षसमन्विता । महती कीर्तिता तस्यां वामनं पूजयेन्नरः ॥" मात्स्ये— " द्वादश्यां भाद्रशुक्ले तु नक्षत्रं श्रवणं यदि ।

उपोष्य द्वादशीं तत्र हरिमभ्यर्चयेन्नरः । भाद्रे तु शुक्लद्वादश्यां नक्षत्रं श्रवणं यदि । श्रवणद्वादशी प्रोक्ता सा नाम मुनिपुङ्गवैः।" अत्र द्वादश्यां यत्किञ्चित् श्रवणयोगेपि सर्वा द्वादशी पुण्या ॥

तथाच मात्स्ये— "द्वादशी श्रवणायुक्ता कृत्स्ना पुण्यतमा स्मृता । न तु सा तेन संयुक्ता तावत्येव प्रशस्यते ॥" नारदीये च श्रवणद्वादशीं प्रकृत्य— "तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप। द्विकलो यदि लभ्येत स ज्ञेयो ह्याष्टयामिकः" ॥

श्रीविष्णुपुराणे—"याः काश्च तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः । तास्वेव तद्व्रतं कुर्य्यात् श्रवणद्वादशीं विना । कृत्तिकादि भरण्यन्तं वारं वा रविसप्तकम् । नैते संयोगमात्रेण पुनन्ति सकलां तिथिम् ।" शङ्करगीतोक्तवचनप्राप्तपूर्णनक्षत्रयोगः द्वादशीव्यतिरिक्ततिथिनक्षत्रयोगवियोगविषय इति । यत्किञ्चिच्छ्रावणयोगेपि सा द्वादशी ग्राह्यैव भवति; इयञ्च द्वादशी उत्तरविद्धा न ग्राह्या, तदुक्तं स्कान्दे—"द्वितीया पञ्चमीविद्धा दशमी च त्रयोदशी । चतुर्दशी चोपवासे हन्युः पूर्वोत्तरां तिथिम्" । कौर्मे— "नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः । कामविद्धो भवेद्विष्णुर्न ग्राह्यास्ते तु वासराः ॥ रुद्रः—अष्टमी; दिवाकरः

सप्तमी, कामस्त्रयोदशी, विष्णुः—श्रवणद्वादशी। पैठीनसिः, युग्माग्नियुगभूतानि षरामुनिर्वसुरन्ध्रके। रुद्रेण द्वादशी युक्ता चतुर्दश्या तु पूर्णिमा। प्रतिपदाथाऽमावास्या त्रयोदश्या चतुर्दशी। एतद्युग्मं महापुण्यं प्रवदन्ति मनीषिणः। व्यस्त-मेतन्महादोषो हन्ति पुण्यं पुरातनम्। कालनिर्णये— "उदये पूर्वया तिथ्या विद्ध्यते त्रिमुहूर्तकैः। सायं तूत्तरया तद्वन्न्यूनया तु न विद्ध्यते। सा च युग्मा शास्त्रेण पूर्वविद्धैव गृहीतव्येति। एवमुक्तोधस्त्याज्यः पूर्ववेधोऽत्यन्तमुख्यत्वात् ग्राह्यो भवति। स्कान्दे— द्वादशी च प्रकर्त्तव्या एकादश्या युता विभोः। सदा कार्य्या च विद्धाभिः विष्णुभक्तैश्च मानवैः। अत्रैव 'द्वादशीं श्रवणर्क्षञ्च स्पृशेदेकादशी यदि। सा विष्णुशृङ्खला नाम सायुज्यफलदा स्मृता। द्वादशी पूर्वविद्धैव निखिलेषु व्रतेष्वपि। शयनोत्थानयोर्विष्णोः परविद्धा प्रशस्यते" नारदीये—" संस्पृश्यैकादशी राजन् द्वादशी यदि संस्पृशेत्। श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्या व्यपोहति। यश्चात्र त्रिमुहूर्तवेध एव। तथा पैठीनसिः 'पक्षद्वयेपि तिथयः तिथिं पूर्वां तथोत्तराम्। त्रिभिर्मुहूर्त्तैर्विद्ध्यन्ति सामान्योऽयं विधिः स्मृतः। श्रवणद्वादशीविषये विशेषानभिधानात्— इदं च

श्रवणद्वादशीव्रतं काम्यम्, अभ्युदयसाधनत्वात्। 'द्वादश्यामुपवासेन सिद्धार्थो भूप सर्वशः। चक्रवर्तित्वमतुलं सम्प्राप्नोत्यचलां श्रियम्" भविष्योत्तरे 'या रामश्रवणोपेता द्वादशी महती शुभा। तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम्। प्राप्नोत्ययत्नाद्धर्मज्ञो द्वादशद्वादशीफलम्।" युधिष्ठिरः—मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता। सर्वकामप्रदा पुण्या सेव्या साच महाफला। सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः समग्रं समवाप्नोति द्वादशद्वादशीफलम्। द्वादशी श्रवणोपेता यदा भवति भारत। सङ्गमे सरितां स्नात्वा गङ्गादिस्नानजं फलम्। सोपवासी समाप्नोति नात्र कार्या विचारणा।" यमः "यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत्। नाम्ना साहि महापुण्या नाम्ना तु विजया हि सा। तस्यां स्नात्वा विधानेन सर्वतीर्थफलं लभेत्। अर्चयित्वाच्युतं भक्त्या लभेत्पुण्यं दशाधिकम्। मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता। महती द्वादशी ज्ञेया उपवासे महाफला। सङ्गमे सरितां स्नात्वा द्वादशीं तामुपोषितः। आप्लवादेव चाप्नोति द्वादशद्वादशीफलम्। बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत्। अत्यन्तमहती तस्यां दत्तं भवति चाक्षयम्। अर्चयित्वाऽच्युतं

भक्त्या भवेत्पुण्यं दशाधिकम्। फलं दत्तकृतानाञ्च तस्यां लक्षगुणं भवेत् ।" विष्णुधर्मोत्तरे–" श्रवणद्वादशीयोगे बुधवारो भवेद्यदि। अत्यन्तमहती नाम द्वादशी सा प्रकीर्तिता। स्नानं जपं तथा दानं होमः श्राद्धं सुरार्चनम् । सर्वमक्षय-माप्नोति तस्यां भृगुकुलोद्वह । तस्मिन् दिने तथा स्नात्वा यत्र क्वचन सङ्गमे । स गङ्गास्नानजं रामफलं प्राप्नोत्य-संशयः । श्रवणात् सङ्गमात्सर्वे परतुष्टिप्रदास्सदा। विशे-षाद्द्वादशीयुक्तो बुधयुक्तो विशेषतः । बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत्। अतीव महती तस्यां सर्वं दत्तं महा-क्षयम्। श्रवणद्वादशीयोगे पूजयित्वा जनार्दनम् । दानञ्च दत्त्वा विप्रेभ्यस्सोपवासो जितेन्द्रियः । महानदीसङ्गमेषु प्रतिवर्षं युधिष्ठिर । चकार विधिवद्दानं ततो दिष्टान्तमा-गतः। अत्यन्तपरमं स्थानं दुर्लभं सर्वमानवैः। यत्र काम-फला वृक्षा नद्यः पायसकर्दमाः। नदी चामलपानीया पुष्क-रिण्यो मनोरमाः। तं देशमासाद्य वणिङ्महात्मा सुमृष्टजा-म्बूनदभूषिताङ्गः। कल्पं समग्रं सुरसुन्दरीभिः साकं सुरेमे मुदितस्स देवः । बुधश्रवणसंयुक्ता द्वादशी सङ्गमोदकम् दानं दध्योदनं शस्तमुपवासोऽपरो निधिः। सगरेण ककु-

त्स्थेन धुन्धुमारेण गाधिना। एतैश्चान्यैश्च राजेन्द्र कामदा द्वादशी कृता। या द्वादशी बुधयुता श्रवणेन सार्द्धं सा वै जयन्ति कथिता मुनिभिर्नभस्ये । तामादरेण समुपोष्य नरो हि सम्यक् प्राप्नोति सिद्धिमणिमादिगुणोपपन्नाम्' एवमभ्युदयहेतुत्वेन श्रवणद्वादशीव्रतं काम्यम् . एवं मोक्षहेतुत्वाच्च काम्यं भवति, मार्कंडेयः 'एषा निःश्रेयसे भूप फलभोगविवर्जिता । मोक्षात्मिका परा प्रोक्ता द्वादशिप्रवरा तिथिः। जनकानां महीपाला द्वादश्यां समुपोषणैः । सप्तभिस्सप्तभिर्युक्ताः संसिद्धिं परमां गताः। पुरुकुत्सो महीपालो द्वादश्यां समुपोषणैः। सिद्धिं गतः परित्यज्य धर्मबन्धुर्दुरासदः । मान्धाता यौवनाश्वश्च द्वादश्यां समुपोषणैः। संग्रामे निधनं प्राप्य संप्राप्तः परमं पदम्। शाकुन्तलो महीपालो दौष्यंतिरपराजितः । द्वादश्यामुपवासेन गतास्ते वैष्णवं पदम्। ते राजपुरुषा भूप द्वादश्यां समुपोषणैः। संग्रामे निधनं प्राप्य संप्राप्ताः परमं पदम्। सिद्धिं पारमिकां प्राप्ता ये द्विजास्तान् शृणुष्व मे । यावत् कृतस्तु रैभ्यस्तु माण्डव्यः कौशिको मुनिः । भरद्वाजस्तथा कण्वः कुम्भयोनिस्तपोनिधिः । अष्टाशीतिसहस्राणि ऋषीणामूर्द्धरेतसाम् । प्रयांति सदनस्याग्रे तिभिनाच्च जनाधिप। ते सर्वे

परमां सिद्धिं द्वादश्यां समुपोषणैः । [भूपा भगवतं भूप कथं ते शंशयो भवेत्] । मात्स्ये 'द्वादशी श्रवणं स्पृष्ट्वा स्पृशेदेकादशी यदि । स एव वैष्णवो योगो विष्णुशृंखलसंज्ञिकः । तस्मिन्नुपोष्य विधिवत् नरस्स क्षीणकल्मषः । प्राप्नोत्यनुत्तमां सिद्धिं पुनरावर्त्तिदुर्लभाम् ।' विष्णुधर्मोत्तरे "एकादशी द्वादशी भं वैष्णव्यमपि यत्र चेत् । तद्विष्णुशृङ्खलन्नाम विष्णुसायुज्यकृद्भवेत् । उपोष्य विधिवत् गच्छेत्तस्मिन् हरिपुरं ध्रुवः । द्वादश्यामुपवासोऽत्र त्रयोदश्याञ्च पारणम् । निषिद्धमपि कर्तव्यमाज्ञेयं पारमेश्वरी । स्कान्दे 'द्वादशी श्रवणर्क्षञ्च स्पृशेदेकादशी यदि । सा विष्णुशृङ्खला नाम सायुज्यफलदा स्मृता" इति । एवं भुक्तिमुक्तिसाधनत्वाच्छ्रवणद्वादश्याःकाम्यत्वमुक्तम् । अथाकरणे प्रत्यवायस्मरणान्नित्यत्वमप्यवगम्यते ; धर्मसेतुनिबन्धने 'करिष्यन्तिवनोलोभात् द्वादश्योष्टौ महाफलाः । तेषां धर्मपुरे वासः यावदाभूतसंप्लवम्" स्मृतिसारसमुच्चये 'द्वादशीं श्रवणोपेतां यो नोपोष्यति दुर्मतिः । पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति " ब्रह्मकैवर्त्ते 'द्वादश्योऽष्टौ समाख्याता याः पुराणविचक्षणैः । तासामेकापि विमता हन्ति पुण्यं पुरा-

कृतम् ।" एवं श्रवणद्वादशीव्रतं "चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन" इत्युक्तचतुर्विधसमाश्रितान् प्रति नित्यम्, 'सदा कार्या च विद्विद्भिर्विष्णुभक्तैश्च मानवै'रितिवचनात् । अत्र यदा पूर्वेद्युरेकादशी दशमीविद्धत्वे अधिकैकादशीत्वे अधिकद्वादशीत्वे च एकादश्युपवासोपि द्वादश्यामेवापतति तदैकादशीश्रवणद्वादश्युपवासयोस्तन्त्रेणैवानुष्ठानं भवति । यदा च द्वादश्यां श्रवणान्वयाभावेन एकादश्यामेव तदन्वयः तदा श्रवणद्वादशीव्रतमप्येकादश्यामापततीति, तदापि व्रतद्वयस्य तन्त्रेणानुष्ठानं भवति; तदुक्तं भविष्योत्तरे "एकादशी यदा च स्याच्छ्रवणेन समन्विता। उभयोर्देवता विष्णुर्विजया सा स्मृता तिथिः। नारदीये 'यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् । एकादशी तदोपोष्या पापघ्नी श्रवणान्विता । उभयोर्देवता विष्णुः पारणं पुरुषोत्तमः । विभेदोऽत्र न कर्तव्यः विभेदात् पतते नरः । श्रीविष्णुपुराणे 'याः काश्च तिथयः प्रोक्ताः पुण्या नक्षत्र योगतः । तास्वेवतद्व्रतं कुर्य्याच्छ्रवणद्वादशीं विना । यदा श्रवणस्य विद्धैकादश्यन्वयाभावः तदा निष्कामानां श्रवणद्वादशीव्रतानुष्ठानाभाव एव, सकामस्य विद्धायामेव द्वादशीव्रतानुष्ठानं भवति. तथा

स्कान्दे 'यदि स्याद्दशमीविद्धा श्रवणर्क्षसमन्विता। शुद्धामेकादशीं त्यक्त्वा तां विद्धामुपवासयेत्। एवमेकादश्युपवासस्य श्रवणद्वादशीपतित्वे श्रवणद्वादशीव्रतस्य एकादश्युपवासघाते च तंत्रेण व्रताद्यनुष्ठानं दर्शितम्। यदा चोभयसाङ्कर्ये व्रतोभयस्यापि प्रत्येकानुष्ठानं प्रसजेत् तदा व्रतद्वयशक्तस्य उभयमपि प्रत्येकं क्रमेणानुष्ठेयम्। ब्रह्मपुराणे 'एकादशी यदा शुद्धा द्वादशी श्रवणान्विता। उपवासद्वयं कुर्य्यात् पूर्वपक्षो भवेद्यदि"। भविष्योत्तरे 'एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत्। न तत्र विधिलोपः स्यादुभयोर्देवता हरिः"। अनेन "पारणान्तं व्रतं ज्ञेयं व्रतान्तं विप्रभोजनम्। असमाप्ते व्रते पूर्वे नैव कुर्य्याद्व्रतान्तरम्" इति पारयत्तेः कर्मसमाप्त्यर्थत्वात् पारणाभावे पूर्वव्रतसमाप्त्यभावात् द्वितीयोपवासप्रक्रम एव न सम्भवतीतिशङ्का परिहृता। व्रतान्तराणां तथात्वेपि प्रकृतव्रतद्वयस्याप्येकदेवतात्वान्नोक्तादोष इति. यस्य व्रतद्वयानुष्ठाने शक्तिर्नास्ति स एकमेव व्रतं कुर्यात्। किमेकमितिचेत्? य एकादशीव्रतानुष्ठाननिष्ठस्तेनैकादशीव्रतमेव कार्य्यम्। तदुक्तं मात्स्ये "उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम्। श्रवणेन सिता यत्र द्वादशी

लभ्यते क्वचित् । उपोष्यैकादशीं तत्र द्वादश्यामर्च्चयेद्धरिम् ।' द्वादश्यां हरिमभ्यर्च्च्य पारणं कुर्य्यादित्यर्थः । यश्चोपवासद्वयासमर्थो द्वादशीव्रतनिष्ठस्तेन श्रवणद्वादशीव्रतमेव कार्य्यम्. तदुक्तं नारदीये "उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम्। एकादश्योद्भवं पुण्यं नरः प्राप्नोत्यसंशयः। एकाद्धे द्वादशीं शुक्लां द्वादश्यास्समुपोषणात् । पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयः । पाद्मे 'एकादश्यामविद्धायां संप्राप्तश्रवणान्विता । उपोष्या द्वादशी तत्र सर्वपापक्षयावहा" तत्रैव 'यदा ह्येकादशी शुद्धा द्वादशी श्रवणान्विता । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् ' भविष्यत्पुराणे 'एकादशी यदा शुद्धा द्वादशी श्रवणान्विता। उपवासद्वयं कुर्य्यादशक्तौ द्वादशीमिति । ब्रह्मपुराणे'उपोष्य द्वादशीं वापि विष्णवर्क्षेण समन्विताम्। एकादश्युद्भवं पुण्यं सर्वमाप्नोत्यसंशयः,स्मृत्यन्तरे 'शुद्धामेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् । पूर्वोपवासजं पुण्यं सर्वमाप्नोत्यसंशयः ।' अत्रैकादशीव्रतश्रवणद्वादशीव्रतयोर्नित्यत्वेनाकरणे प्रत्यवायादेकादश्यामन्नवर्जनस्य संध्यावन्दनादिवदावश्यकत्वाच्च कथमेकादश्यां भुक्त्वा कथं श्रवणद्वादश्युपवासः ? कथं वा श्रवणद्वादश्यां भुक्त्वा एकादशीमात्रोप-

षास इत्यत्राह नारदः 'वाजपेये यथा यज्ञकर्महीनोपि दीक्षितः। सर्वं फलमवाप्नोति अस्नातोप्यहुतोपि वा' इति। अत एवैकैकव्रतपरित्यागेपि प्रत्यवायो नास्तीत्यर्थः। एवं नित्यकाम्यश्रवणद्वादशीव्रतं केवलं प्रत्त्यवायनिवृत्त्यर्थिभिः प्रपन्नैरप्यनुष्ठेयमेव, तदनुष्ठेयत्वे च सङ्कल्पावाहनहोमाद्यङ्गनिरपेक्षं भवति, तदुक्तं पाद्मे 'न सङ्कल्पो नचावाहो न दानं नार्घ्यमिष्यते। एकान्तिनान्तु सर्वेषां सर्वशास्त्रेषु कीर्त्यते, इति। एवमुत्सवान्त एव पारणमिति वसिष्ठसंहितायामुक्तं 'सदा सर्वजयन्त्यां वै यदा कुर्यात्स्वभक्तितः। पूजादीनाञ्च करणमुत्सवान्ते तदा भवेत्। प्रपन्नानां मुमुक्षूणामुत्सवान्ते च पारणम्। विधिः स्याद्विष्णुसायुज्यसिद्धये मन्त्रसिद्धये। इतरेषां व्रतान्ते तु दानान्ता पारणा भवेत्' इति। एवञ्च सति दिवैव प्रपन्नानां पारणं वामनस्य दिवैवावतारात्। भागवते 'शुक्लायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः। जज्ञे नक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम्। द्वादश्यां सविता तिष्ठन् माध्यन्दिनगतेऽहनि। व्याससंहितायां 'मासि भाद्रपदे शुक्लद्वादश्यां श्रवणे तथा। कन्यालग्ने तु कन्यांशे जातः श्रीवामनो विभुः। तत्तिथ्यां वृश्चिके लग्ने वृश्चिकांशे त्रिविक्रमः। स एव वामनस्साक्षात्

सर्वव्यापी विभुः प्रभुः । तद्वत्तदा च तद्ध्यायेत् सर्वलोक-जयाय च । मोक्षार्थे च विशेषेण सर्वबन्धविमुक्तये । तज्जय-न्त्यर्चनं कृत्वा उत्सवान्ते च पारणम् । कुर्यात् सवैष्णवैस्स-म्यक्भगवद्धर्मसिद्धये' इति । प्रपन्नादन्येषां परेद्युस्तिथिनक्षत्र-द्वयान्ते पारणं भवति, तदुक्तं स्कान्दे 'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् । अतोऽन्यथापारणाद्धि व्रतभङ्गमवाप्नु-यात् । याः काश्च तिथयः प्रोक्ताः पुण्या नक्षत्रसंयुताः । ऋक्षान्ते पारणं कुर्यात् विना श्रवणरोहिणीम्' नारदीये 'तिथिनक्षत्रयोगे तु उपवासो भवेद्यदा । पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥ ....

इति श्रीमहीसारपुरवास्तव्य वाधूलकुलतिलकश्रीमदण्णाव-य्यङ्गारार्यापरनामधेयश्रीवीरराघवसूरिविरचिते सच्चरित्र-परित्राणे श्रीश्रवणद्वादशीनिर्णयः समाप्तः ॥

श्रीः ॥

अथ गुर्वन्तरव्रजनविषये किञ्चिदुच्यते।

महाभारते 'मधुलुब्धो यथा भृङ्गो वृक्षाद्वृक्षान्तरं व्रजेत्। ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्' इति. शाण्डिल्यश्च— 'आचार्यचित्तानुगुणं सिद्धान्तानुगुणं त्वपि। अन्यत्र शृणुयात् ज्ञेयमनुज्ञाप्यैव जीवति' इति. आचार्य्यैतरमितिशेषः। जीवत्यनुज्ञापनवचनादजीवति न तदपेक्षेति गम्यते, स एव 'यस्मिन् परमविद्याया न संसिद्धिरबोधतः। गुरोर्वाप्यन्यतो ग्राह्या परा विद्या गुणान्वितात्' इति। यस्मिन्— गुरौ उत्तरार्धे तस्मादिति भवति, यत्तदोर्नित्यसम्बन्धात्। न च गुर्वन्तराश्रयणेन पूर्वगुरुसम्बन्धोऽपैति। भृङ्गदृष्टान्तेन तत्तत्सम्बन्धसमावेशस्यैव सिद्धेः। नचोत्तराश्रमप्राप्तौ पूर्वाश्रम निवृत्तिवदुत्तरोत्तरगुर्वाश्रयणे पूर्वपूर्वगुरुसम्बधापायो वाचनिकः। +'गुरोरपह्नवात्त्यागात्साम्याद्विस्मरणादपी'ति भरद्वाजवचनन्तु परमविद्याप्रदानसमर्थगुरुत्यागनिषेधकम् ॥ अननुज्ञाप्यान्यत्र श्रवणनिषेधकञ्च; अतो यथासम्प्रदायमधिकलिप्सायां नानागुरुसमाश्रयणं युक्तमिति ॥

+ लोभमोहादिभिश्चान्यैरपचारैर्विनश्यति ॥

अथ गृहस्थेन यतीनां ब्रह्मविद्योपदेशविषये किञ्चिदुच्यते—तदाह शाण्डिल्यः 'ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । कृपयाश्रमिणस्सर्वे धर्मं ब्रूयुस्स्वलिङ्गिने । गृहस्थो वापि सर्वेभ्यो धर्मं ब्रूयान्महामतिः । परिव्राडपि वा ब्रूयात् सर्वेभ्यश्चाधिको गृही', इति, सर्वेभ्यः—ब्रह्मचारिवानप्रस्थयतिभ्यः । यतीनामनाचार्यविषये भरद्वाजेन सत्सेवनाधिकारोक्तं सर्वं कर्तव्यम्, तथाहि 'दण्डवत् प्रणमेद्भूमौ उपेत्य गुरुमन्वहम् । दिशे वापि नमस्कुर्य्याद्यद्यसौ वसति स्वयम् । आचार्याय हरेदर्थानात्मानञ्च निवेदयेत् । तदधीनश्च वर्तेत साक्षान्नारायणो हि सः' इत्यादेः । नच गृहिणस्सकाशात् यतीनां ब्रह्मविद्याग्रहणमापत्कल्पः । 'नच हीनवयोजातिः प्रकृष्टानामनापदि' इत्यत्राश्रमानुक्तेः । 'सर्वेभ्यश्चाधिको गृही' इत्युक्तेः । नच राजन्यात् ब्राह्मणेन विद्याग्रहणवत् शुश्रूषासङ्कोचो वाचनिकः, अतः प्रसादस्वीकारगर्भा +गुरौ वृत्तिर्यतेरावश्यकी, एवं यतीनामपि प्रसादो गृहस्थादिभिः शिष्यैर्भोज्यो नियमितः । नच 'यत्यन्नं यति-

---

+चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमुच्यते । प्राहुर्धर्मज्ञधर्मज्ञास्तं कथं त्यक्तुमर्हति ॥

पात्रस्थ' मिति निषेधः, तस्यानाचार्य्यविषयत्वात् अवैष्णव-यतिविषयत्वाच्च । नच 'यो वै मन्त्रवरम्' इत्यादेरयति-गुरुविषयत्वं शक्यम् । यतिगुरूच्छिष्टभोजनस्य विशिष्य स्मरणात् । तथा च भागवते प्रथमस्कन्धे नारदः 'उच्छिष्ट-लेपाननुमोदितो द्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः । एवं प्रविष्टस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते' इति । तत्र हि 'निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् । इत्थं शरत्प्रावृषिका वृतू हरेर्विशृण्वतो मेऽनु-सवं यशोऽमलम्, भिक्षुभिर्विप्रवासिते विज्ञानादेवर्षिभिस्तवे'ति भिक्षुभिर्विप्रवसिते विज्ञानादेष्टभिर्ममेति लिङ्गश्रुत्योरभ्या-सेन द्विजैरिति यतिपरम्, तच्च द्विजातीनामयं धर्मः 'यद्विष्णो-र्लिङ्गधारणम् बाहुजातोरुजातानामयं धर्मो न विद्यते इत्येतत् प्रत्यभिज्ञानार्थम्, अतो यत्यन्नमित्यादिकमन्यपरम्— इति ॥ §

§ अत्रायं विमर्शः—

अत्र गुर्वन्तरव्रजनन्तु ज्ञानप्राप्त्यर्थमेव, नतु पञ्चसंस्कारदीक्षार्थम्, तस्याः सकृच्छास्त्रविहितत्वात्, यथा ब्राह्मणानां गर्भाधानादिसंस्काराः धर्म-शास्त्रे सकृदेव विधीयन्ते नासकृत्— तथा वैष्णवत्वसम्पादकं पञ्चसंस्कार-

दीक्षादिकमपि पञ्चरात्रसम्प्रदायग्रन्थेतिहासपुराणादिषु हि सकृदेव विधीयते । पुनः पुनः पञ्चसंस्कारस्य शास्त्रेष्वविधीयमानत्वात्, तथा सकृदेव हि शास्त्रार्थः 'सकृदेव प्रपन्नाय' 'सकृत्कृतोऽञ्जलिः' इत्यादिषु सकृच्छब्दस्य वैयर्थ्यापत्तेः, 'उपाये संप्लवे सद्यः प्रायश्चितं समाचरेत्' 'प्रायश्चित्ती भवेत्सद्यो यत्पुनः शरणं व्रजे'दित्यादिशास्त्रनिषिद्धत्वाच्च, 'नारायणोपि विकृतिं याति गुरोः प्रच्युतस्य दुर्बुद्धेः । कमलं जलादपेतं शोषयति रविर्न पोषयति' इति प्राप्यभूतश्रीनारायणानभिमतत्वाच्च, इदं गुर्वन्तरवर्जनं न पुनःपञ्चसंस्कारविषयकम्. अपि तु ज्ञानविवृद्ध्यर्थम् । लोकेपि हि ब्राह्मणैरुपनयनसंस्कारः सकृदेव क्रियते, तथैव शङ्खचक्राङ्कनादिरूपपञ्चसंस्कारोऽपि सकृदेवानुष्ठेय इति शास्त्राभिज्ञानां पन्थाः ॥

शुद्धाशुद्धपत्रम् ।

रामजयन्तीनिर्णये

पृ०	पं०	अशुद्धम्	शुद्धम्
३	९	नामः	नाम
६	७	वे	वेधा

श्रीरामनवम्यादिज०

२	६	न्वतार	न्ववतार

श्रवणद्वादशीनिर्ण०

३	१५	हस्त्या	हस्त्यां
७	२	शंशय	संशय
७	१४	नो	यो
७	१७	कैवर्तै	वैवर्ते
८	५	प्रसजेत्	प्रसज्येत

गुर्वन्तरव्रज०

३	६	देवर्षि	देष्टृभि
३	१०	देष्टभि	देष्टृभि
४	८	अर्जन	अर्जन

पुस्तकप्राप्तिस्थानम्:— रामप्रपन्नाचार्य शास्त्री
श्रीरङ्गमन्दिर वृन्दावन यू. पी.